# Navagrahastava by Vyasa

# व्यासकृतः नवग्रहस्तवः

## Document Information

Text title : Navagrahastava by Vyasa

File name : navagrahastavaHvyAsakRRitaH.itx

Category : navagraha, vyAsa, bRihaddharmapurANam

Location : doc_z_misc_navagraha

Proofread by : Ruma Dewan

Description/comments : Brihaddharmapuranam | uuutarakhaNDaH | adhyAyaH 11| 180 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# व्यासकृतः नवग्रहस्तवः

व्यास उवाच ।
शृणुष्व द्विजशार्दूल सूर्यस्तोत्रं महाफलम् ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १॥

-

## १. सूर्यः

॥ अथ सूर्यस्तोत्रम् ॥

(सूर्याष्टोत्तरशतनामस्तोत्रम्)

ओङ्काररूपो गवान् भास्करश्च विकर्तनः ।
सूर्यो रविः काश्यपेयो भानुर्दिनकरः प्रभुः ॥ २॥

लोकप्रकाशकः साक्षी श्रीमांल्लोकदिगीश्वरः ।
गभस्तिमाली सप्ताश्च स्त्रिगुणः कमलासनः ॥ ३॥

ग्रहेश्वरो गुणाधारो ब्रह्मविष्णुशिवात्मकः ।
ज्योतिष्मान् ज्योतिषां नाथो ब्रह्मा ब्राह्मणदैवतः ॥ ४॥

त्रैगुण्यनायको दिव्यो लोकबन्धुर्भयापहः ।
तिमिरारी रश्मिमाली सहस्रकिरणः करी ॥ ५॥

शूरः करीन्द्रो मैत्रेयः केवलात्मार्यमामलः ।
पद्मप्रकाशको धाता विष्णुस्त्वष्टांशुरेव च ॥ ६॥

वेदात्मा वेदवेद्यश्च यमकर्ताश्विनीपतिः ।
नासत्यदत्रजनको ज्ञानज्योतिः सनातनः ॥ ७॥

पूषा विवस्वानादित्यो द्वादशात्मा दिवाकरः ।
अहस्करः प्रभाराशी रोगहा रुक्चिकित्सकः ॥ ८॥

महौषधस्मृतिः पुण्यः परमार्थः स्मृतार्त्तिहा ।
ऋषिस्तुत्यो जपप्रीतो गायत्रीजनकोऽव्ययः ॥ ९॥

गायत्रीजपसुप्रीतस्त्रिसन्ध्यपरसुप्रियः ।
शिवपूजकसुप्रीतो विष्णुपूजकसुप्रियः ॥ १०॥

गङ्गास्नानप्रियप्रीतो दुर्गाजपसुहृद्वरः ।
पितृमातृभक्तिभक्तो धर्मो धर्मात्मदण्डकृत् ॥ ११॥

रक्तवर्णः श्यामवर्णो धवलः कालभेदतः ।
स्वयम्भूरन्नदो वारिप्रदो ह्यरुणसारथिः ॥ १२॥

पिता पितामहो देवो दक्षिणाशापतिः सुरुक् ।
आकाशरत्नं तरणिश्चित्रभानुर्विरोचनः ॥ १३॥

मार्त्तण्डोऽर्को वायुकर्ता सम्यक्ज्ञाता कृपामयः ।
प्रातर्मध्याह्नसायाह्ने सन्ध्यावन्दनकृत्प्रियः ॥ १४॥

प्रातर्ब्राह्मणहस्ताब्जजलाञ्जलिसुखी सदा ।
तपनस्तापनो विश्वस्तीर्थोदय उदारधीः ॥ १५॥

भूरसग्राहकश्चेति सूर्यनामशतं परम् ।
फलश्रुतिः ।
साष्टकं कथितं तुभ्यं पापरोगहरं परम् ॥ १६॥

सर्वज्वरप्रशमनं सर्वव्याधिमहौषधम् ।
पवित्रं पुण्यदं पुण्यं यः पठेत् सुसमाहितः ॥ १७॥

तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते ।
उत्पन्नेषु ह्यरिष्टेषु सङ्कल्प्येदं पठेत् शुभम् ॥ १८॥

तदा तस्यारिष्टशान्तिर्भवत्येव न संशयः ।
रविप्रियदिने पुण्ये रविं सम्पूज्य यः पठेत् ॥ १९॥

स रवेर्मण्डलं भित्वा याति ब्रह्म ह्यनागतिम् ।
॥ इति सूर्यस्तोत्रम् ॥

-

अथ वक्ष्ये शशिस्तोत्रं तच्छृणुष्व मुदान्वितः ॥ २०॥

-

## २. शशिः

॥ अथ शशिस्तोत्रम् ॥

(चन्द्राष्टोत्तरशतनामस्तोत्रम्)

चन्द्रोऽमृतमयः श्वेतो विधुर्विमलरूपवान् ।
विशालमण्डलः श्रीमान् पीयूषकिरणः करी ॥ २१॥

द्विजराजः शशधरः शशी शिवशिरोगृहः ।
क्षीराब्धितनयो दिव्यो महात्माऽमृतवर्षणः ॥ २२॥

रात्रिनाथो ध्वान्तहर्त्ता निर्मलो लोकलोचनः ।
चक्षुराह्लादजनकस्तारापतिरखण्डितः ॥ २३॥

षोडशात्मा कलानाथो मदनः कामवल्लभः ।
हंसःस्वामी क्षीणबृद्धो गौरः सततसुन्दरः ॥ २४॥

मनोहरो देवभोग्यो ब्रह्मकर्मविवर्द्धनः ।
वेदप्रियो वेदकर्मकर्ता हर्त्ता हरो हरिः ॥ २५॥

उद्धर्ववासी निशानाथः शृङ्गारभावकर्षणः ।
मुक्तिद्वारं शिवात्मा च तिथिकर्ता कलानिधिः ॥ २६॥

ओषधीपतिरब्जश्च सोमो जैवातृकः शुचिः ।
मृगाङ्को ग्लौः पुण्यनामा चित्रकर्मा सुरार्च्चितः ॥ २७॥

रोहिणीशो बुधपिता आत्रेयः पुण्यकीर्त्तकः ।
निरामयो मन्त्ररूपः सत्यो राजा धनप्रदः ॥ २८॥

सौन्दर्यदायको दाता राहुग्रासपराङ्मुखः ।
शरण्यः पार्वतीभालभूषणं भगवानपि ॥ २९॥

पुण्यारण्यप्रियः पूर्णः पूर्णमण्डलमण्डितः ।
हास्यरूपो हास्यकर्ता शुद्धः शुद्धस्वरूपकः ॥ ३०॥

शरत्कालपरिप्रीतः शारदः कुमुदप्रियः ।
द्युमणिर्दक्षजामाता यक्ष्मारिः पापमोचनः ॥ ३१॥

इन्दुः कलङ्कनाशी च सूर्यसङ्गमपण्डितः ।

सूर्योद्भूतः सूर्यगतः सूर्यप्रियपरःपरः ॥ ३२॥

स्निग्धरूपः प्रसन्नश्च मुक्ताकर्पूरसुन्दरः ।
जगदाह्लादसन्दर्शो ज्योतिःशास्त्रप्रमाणकः ॥ ३३॥

सूर्याभावदुःखहर्त्ता वनस्पतिगतः कृती ।
यज्ञरूपो यज्ञभागी वैद्यो विद्याविशारदः ॥ ३४॥

रश्मिकोटिर्दीप्तिकारी गौरभानुरिति द्विज ।
फलश्रुतिः ।
नाम्नामष्टोत्तरशतं चन्द्रस्य पापनाशनम् ॥ ३५॥

चन्द्रोदये पठेद्यस्तु स तु सौन्दर्यवान्भवेत् ।
पौर्णमास्यां पठेदेतं स्तवं दिव्यं विशेषतः ॥ ३६॥

स्तवस्यास्य प्रसादेन त्रिसन्ध्यापठितस्य च ।
सदाप्रसादास्तिष्ठन्ति ब्राह्मणाश्च द्विजोत्तम ॥ ३७॥

श्राद्धे चापि पठेदेतं स्तवं पीयूषरूपिणम् ।
तत्तु श्राद्धमनन्तञ्च कलानाथप्रसादतः ॥ ३८॥

दुःस्वप्ननाशनं पुण्यं दाहज्वरविनाशनम् ।
ब्राह्मणाद्याः पठेयुस्तु स्त्रीशूद्राः शृणुयुस्तथा ॥ ३९॥

ब्राह्मणाः शृणुयुश्चापि लभेयुश्च समं फलम् ।
॥ इति शशिस्तोत्रम् ॥

–

अथान्येषान्तु नामानि स्तोत्ररूपाणि मे शृणु ॥ ४०॥

–

## ३. मङ्गलः

॥ अथ मङ्गलस्तवम् ॥

(मङ्गलैकविंशनामानि)

मङ्गलस्य स्तवं वक्ष्ये सर्वमङ्गलदायकम् ।
मङ्गलो भूमिपुत्रश्च रक्ताङ्गोऽरुणलोचनः ॥ ४१॥

अङ्गारको दीप्तारः शस्त्रपाणिः ऋणापहा ।
मेषराश्यधिपो रक्तो रक्ताम्बरधरस्तथा ॥ ४२॥

शूकराश्यधिपो देवो यात्रामङ्गलवृत्तिदः ।
समुद्रशोषकश्चैव वह्निनेत्रः प्रतापवान् ॥ ४३॥

धनदः प्रीतवदनः प्रलयात्मा प्रमोददः ।
फलश्रुतिः ।
इत्येकविंशतिं नाम्नां मङ्गलस्य तु यः पठेत् ॥ ४४॥

स एव निरृणो भूत्वा धार्मिकश्च धनी भवेत् ।
सम्पूज्य रक्तपुष्पेण मङ्गलाहे च मङ्गलम् ॥ ४५॥

स्तवमेतं पठित्वा तु निरृणः सन् धनी भवेत् ।
॥ इति मङ्गलस्तवम् ॥

–

अथ वक्ष्ये बुधस्यापि स्तोत्रं बुद्धिविवर्द्धनम् ॥ ४६॥

–

## ४. बुधः

॥ अथ बुधस्तोत्रम् ॥

(बुधैकविंशनामानि)

बुधो गौरतनुः सौम्यो मानवीशः शुभाननः ।
शुभग्रहः पुण्यकीर्त्तिस्तारेयश्च इलापतिः ॥ ४७॥

पुरूरवपिता धीरः कुमारो राजवल्ल्भः ।
राजपुत्रो राज्यदाता ब्रह्मराज उषर्वुधः ॥ ४८॥

द्वन्द्वराश्यधिपश्चैव सिंहराश्यधिपस्तथा ।
नवग्रहप्रियश्चेति नाम्नामेवैकविंशतिम् ॥ ४९॥

फलश्रुतिः ।
बुधस्य यः पठेदेतां स यात्रायां सुखं लभेत् ।
ग्रहास्तस्य प्रसन्नाः स्युः पुत्रवान् धनवान् भवेत् ॥ ५०॥

धर्मज्ञानञ्च पाण्डित्यं जायते तस्य सर्वशः ।

॥ इति बुधस्तोत्रम् ॥

–

अथ वक्ष्ये गुरुस्तोत्रं जावाले शृणु कथ्यते ॥ ५१॥

–

## ५. गुरुः

॥ अथ गुरुस्तोत्रम् ॥

( गुरुसप्तविंशनामावलिः )

देवाचार्यो गुरुर्जीवः कमनीयः सुरेश्वरः ।
वाचस्पतिः पण्डितश्च सर्वशास्त्रवरः सुरः ॥ ५२॥

धिषणो गीस्पतिर्ब्रह्मा ब्राह्मणश्च बृहस्पतिः ।
श्रीमानाङ्गिरसस्तारावल्लभो जीवनप्रदः ॥ ५३॥

ज्येष्ठो ज्येष्ठग्रहो विज्ञो धनुर्मीनाधिपो जयः ।
शुभग्रहो यज्ञकर्ता कृती चित्रशिखण्डिजः ॥ ५४॥

फलश्रुतिः ।
नामान्येतानि जीवस्य पाद्यानि सप्तविंशतिः ।
बुद्धिवृद्धिकराण्याहुः प्रसादेन बृहस्पतेः ॥ ५५॥

ब्राह्मणो वेदविज्ञः स्यादन्येषां स्वोचितं फलम् ।
यात्रायां मङ्गलश्चापि स्तवराजो बृहस्पतेः ॥ ५६॥

॥ इति गुरुस्तोत्रम् ॥

–

शृणुष्व द्विजशार्दूल शुक्रनामानि सम्प्रति ।
शिवावताररूपस्य दैत्याचार्यस्य धीमतः ॥ ५७॥

–

## ६. शुक्रः

॥ अथ शुक्रस्तोत्रम् ॥

(शुक्रसप्तविंशनामानि)

शुक्रो दैत्यगुरुः श्रीमान् कविः काव्यश्च भार्गवः ।
सितः शुक्लः शुचिर्विप्रो महात्मा शङ्करः प्रभुः ॥ ५८॥

उशना उत्तमौजाश्च उदयी उज्वलत्प्रभः ।
ऊर्ज्जस्वी वृषराशीशस्तुलाराश्यधिपस्तथा ॥ ५९॥

मृतसञ्जीवको ज्ञाता विद्याविनयपण्डितः ।
सद्ग्रहः साधुशीलश्च ययातिश्वशुरो वशी ॥ ६०॥

फलश्रुतिः ।
एतानि कविनामानि प्रोक्तानि सप्तविंशतिः ।
पठ शृणुष्व जावाले पाठय श्रावयापि च ॥ ६१॥

शुक्राचार्यस्तवं यस्तु पठेत् शुक्रदिनेषु च ।
तस्य प्रीतो भवेत् शुक्रः श्वेतपुष्पैश्च पूजितः ॥ ६२॥

शतावृत्तिं पठन्नस्य कविर्भवति नान्यथा ।
प्रत्यहं भक्तिभावेन यः पठेत् सुसमाहितः ॥ ६३॥

तस्य धर्मे शुभा बुद्धिर्भवत्येव न संशयः ।
इत्येतत् कथितं स्तोत्रं शुक्राचार्यस्य भास्वतः ॥ ६४॥

॥ इति शुक्रस्तोत्रम् ॥

–

अथ वक्ष्ये शृणु स्तोत्रं शनेः सूरसुतस्य ह ।
शनिग्रहो भवद् येन तुष्टः शुभवरप्रदः ॥ ६५॥

–

## ७. शनिः

॥ अथ शनिस्तोत्रम् ॥

सूर्यपुत्रः शनिः श्यामो मन्दोऽमन्दः शनैश्चरः ।
छायागर्भोद्भवो वीरो दीर्घवक्रः प्रतापवान् ॥ ६६॥

एकाक्षः सर्वसञ्चारी दीर्घवासी शुभाक्षरः ।
एतानि शनिनामानि यः पठेत्प्रयतो नरः ॥ ६७॥

फलश्रुतिः ।
तस्याष्टमगतोऽप्येष भवेदेकादशस्थवत् ।
शनिवारे तु सम्पूज्य शनिं सूर्यसुतं नरः ॥ ६८॥

लभते वाञ्छितं सर्वं ग्रहारिष्टविनाशजम् ।
प्रत्यहं प्रातरुत्थाय यः पठेत्तु शनेः स्तवम् ॥ ६९॥

तस्य सर्वे ग्रहाः साधो भवन्ति सुखदायकाः ।
इति ते कथितं विप्र शनिस्तोत्रं महद्गुणम् ॥ ७०॥

॥ इति शनिस्तोत्रम् ॥

-

राहुनामान्यथो वक्ष्ये राहुप्रीतिकराणि च ।

-

## ८. राहुः

॥ अथ राहुनामाष्टकम् ॥

पीयुषपायी मस्ताख्यो राहुर्भिन्नगतिस्तमः ॥ ७१॥

उपरागग्रहः पुण्यचरित्रः पुत्रवर्द्धयः ।
फलश्रुतिः ।
राहुनामाष्टकमिदं राहुप्रीतिकरं परम् ॥ ७२॥

यः पठेच्छृणुयाद्वापि राहुदोषैर्न सोऽन्वितः ।
॥ इति राहुनामाष्टकम् ॥

-

केतुनामान्यथो वक्ष्ये जावाले शृणु भक्तितः ॥ ७३॥

-

## ९. केतुः

॥ अथ केतुनामानि ॥

सैंहिकेयो धूमनामा दीर्घाङ्गो बहुरूपवान् ।

स्कन्धरूपतनुः केतुर्महाभीमग्रहो ग्रहः ॥ ७४॥

शेषग्रहाख्यो नवमग्रहश्चेति द्विजोत्तम ।
फलश्रुतिः ।
केतूनाञ्चारुनामानि कथितानि मया तव ॥ ७५॥

केतुप्रीतिकराण्याहुः पुत्रसम्पतप्रदानि च ।
॥ इति केतुनामानि ॥

नवग्रहस्तवस्य फलश्रुतिः ।
नवग्रहाणामेते वै स्तवाः सर्वे निरूपिताः ॥ ७६॥

पुण्याः पापहरः सर्वे श्राव्यः पाद्याः प्रयत्नतः ।
नवग्रहस्तवाध्यायं यः पठेत् प्रातरुत्थितः । ७७॥

प्रदक्षिणाः ग्रहास्तस्य सूर्यचन्द्रादयो द्विज ।
धनं धान्यं धरां धर्मं कीर्त्तिमायुर्यशः श्रियम् ॥ ७८॥

पुत्रान् पौत्रान् शुभां भार्यां गोविन्दे नतिमुत्तमाम् ।
अन्तकाले च गङ्गायां मरणं ददते ध्रुवम् ॥ ७९॥

दुःस्वप्ननाशनाः सर्वे ज्ञातिश्रैष्ठ्यप्रसाधकाः ।
पितॄणां प्रीतिदा एते नवग्रहमहास्तवाः ॥ ८०॥

॥ इति बृहद्धर्मपुराणन्तर्गते नवग्रहस्तवहः ॥

॥ बृहद्धर्मपुराणम् । उत्तरखण्डः । अध्यायः ११। १-८०॥

Proofread by Ruma Dewan

*Navagrahastava by Vyasa*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*